# संस्कृतम् (कोड-सङ्ख्या - 122)
## आदर्श-प्रश्नपत्रम् *
## कक्षा - दशमी (2025-26)

**अवधिः - 3 होराः** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः –**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 10 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | | |
|---|---|---|---|
| ‘क’ खण्डः | : | अपठितावबोधनम् | 10 अङ्काः |
| ‘ख’ खण्डः | : | रचनात्मककार्यम् | 15 अङ्काः |
| ‘ग’ खण्डः | : | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| ‘घ’ खण्डः | : | पठितावबोधनम् | 30 अङ्काः |

4. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

## ‘क’ खण्डः
## अपठितावबोधनम् (10 अङ्काः)

| | | |
|---|---|---|
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>शुद्धं पर्यावरणम् एव अस्माकं जीवनस्य आधारोऽस्ति। असन्तुलितेन पर्यावरणेन न केवलं मानवजातेः अपितु पशुपक्षिणामपि विनाशः सम्भवति। साम्प्रतं प्रदूषणं विश्वस्य महती समस्या अस्ति। कुत्रापि स्वच्छः वायुः न प्राप्यते, न स्वच्छं जलं लभ्यते न च स्वच्छाः खाद्यपदार्थाः प्राप्यन्ते। प्रदूषणस्य आधिक्येन जनाः निरन्तरं विविधैः रोगैः आक्रान्ताः भवन्ति। प्रदूषणस्य निराकरणाय देशाः बहुविधं प्रयासं कुर्वन्ति परन्तु प्रदूषणं तु अनवरतं वर्धते। अद्यत्वे जायमानैः युद्धैः, युद्धाभ्यासैः, यन्त्रालयानां | 10 |

*अवधेयम् - 2024-25 इति शैक्षणिकसत्रस्य मूल्याङ्कनयोजना 2025-26 इति वर्तमानशैक्षणिकसत्रे अपि अनुवर्तिष्यते।

| | | |
|---|---|---|
| | यानानां च धूमेन सम्पूर्णवायुमण्डलं दूषितं सञ्जातम्। वृक्षाणां कर्तनात् शुद्धवायोः उपलब्धता अपि न्यूना जायते। दूषितः वायुः एव श्वासमाध्यमेन हृदयं प्रविशति। अतः विविधाः श्वासरोगाः, हृदयरोगाः, चर्मरोगाः नेत्ररोगाः च जनान् पीडयन्ति। एतेन मानवाः एव न अपितु पशुपक्षिणः अपि रोगग्रस्ताः भवन्ति। वायुप्रदूषणं नगरेषु अधिकम् अस्ति। उद्योगानां विषाक्तं जलं जनाः नद्यां निपातयन्ति येन जलचराणां मानवानां चापि हानिः भवति। अस्माभिः सर्वैः मिलित्वा प्रदूषणसमस्यायाः निवारणाय सर्वे उपायाः कर्तव्याः अन्यथा पृथिव्याम् अपि जीवनम् असम्भवं भविष्यति। यावत् जनाः जागरूकाः न भविष्यन्ति तावत् अस्याः समस्यायाः समाधानं न भविष्यति। अतः वयं प्रदूषणं निवारयाम, पृथ्वीं सुरक्षयाम। प्रदूषणस्य निवारणाय पर्यावरणस्य संरक्षणाय च वृक्षाः रोपणीयाः, उद्योगानां विस्तारः च वैज्ञानिकरीत्या करणीयः, आयुद्धगतिविधयः निवारणीयाः। | |
| | **अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** | 2×1=2 |
| | (i) दूषितः वायुः कथं हृदयं प्रविशति? | |
| | (ii) अस्माभिः कस्याः निवारणं कर्तव्यम्? | |
| | (iii) साम्प्रतं विश्वस्य महती समस्या का अस्ति? | |
| | **आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** | 2×2=4 |
| | (i) वायुप्रदूषणेन के के रोगाः भवन्ति? | |
| | (ii) सम्पूर्णवायुमण्डलं कथं दूषितं जातम्? | |
| | (iii) प्रदूषणस्य निवारणाय के उपायाः कर्तव्याः? | |
| | **इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** | 1 |
| | **ई. यथानिर्देशम् उत्तरत -** | 3×1=3 |
| | (i) 'मलिनम्' इति पदस्य विलोमपदं अनुच्छेदे किं प्रयुक्तम्?<br>(क) प्रदूषणम् (ख) नित्यम्<br>(ग) विनाशम् (घ) स्वच्छम् | |
| | (ii) "उद्योगानां विषाक्तं जलं जनाः नद्यां निपातयन्ति।" अत्र विशेष्यपदं किम्?<br>(क) विषाक्तम् (ख) जलम्<br>(ग) जनाः (घ) उद्योगानाम् | |
| | (iii) 'प्रविशति' इति क्रियापदस्य कर्तृपदं किम्?<br>(क) श्वासेन (ख) हृदयम्<br>(ग) प्रदूषणम् (घ) वायुः | |

*अवधेयम् - 2024-25 इति शैक्षणिकसत्रस्य मूल्याङ्कनयोजना 2025-26 इति वर्तमानशैक्षणिकसत्रे अपि अनुवर्तिष्यते।

## ‘ख’ खण्डः

### रचनात्मकं कार्यम् (15 अङ्काः)

**2. अ** भवान् हितेशः। पितुः स्थानान्तरणवशात् भवान् असमप्रदेशात् दिल्लीनगरम् आगत्य नूतने विद्यालये प्रवेशं प्राप्तवान्। मञ्जूषायां दत्तानां पदानां सहायतया अस्य नगरस्य विद्यालयस्य च वर्णनं कुर्वन् मित्रं राघवेन्द्रं प्रति पत्रं लिखतु। **5**

**मञ्जूषा**

| |
|---|
| योग्याः शिक्षकाः, सहृदयाः छात्राः, पठनस्य वातावरणम्, दिल्लीनगरात्, ग्रीष्मः, ऐतिहासिकनगरम्, स्थानान्तरणम्, क्रीडाक्षेत्रम्, पुस्तकालयः, पर्यटनस्थानानि, प्रसन्नः। |


**अथवा**

**आ** भवती सुमेधा तिरुपतिस्थे राजकीये माध्यमिकविद्यालये दशमीकक्षायां पठति। विद्यालयस्य शुल्कं दातुं भवती असमर्था अस्ति अतः मञ्जूषायां दत्तानां पदानां सहायतया शुल्कक्षमार्थं निवेदयन्ती प्रधानाचार्यां प्रति प्रार्थनापत्रं लिखतु।

**मञ्जूषा**

| |
|---|
| मम पिता, वाहनचालकः, विद्यालये, सदस्याः, अङ्काः, भ्रातृभगिन्यः, माता, शुल्कम्, वेतनम्, अस्वस्था, असमर्थः, गतकक्षायाम्, प्रथमस्थानम्, अनुग्रहम्, सञ्चालनम्। |

**3. अ** प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत – **5×1=5**



**मञ्जूषा**

| |
|---|
| ऐतिहासिकस्थलम्, रक्तदुर्गम्, पर्यटकाः, वैदेशिकाः, दर्शनाय, धारयन्ति, हरीतिमा, जनाः, मुखाच्छादकम्, भ्रमन्ति, जनसम्मर्दः, राष्ट्रिय-ध्वजः, रक्तपाषाणैः, रक्तवर्णः, प्राचीरः। |

| | | |
|---|---|---|
| आ | **अथवा**<br>**मञ्जूषायां प्रदत्तशब्दानां साहाय्येन अधोलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -**<br>**"मार्ग-सुरक्षा"**<br>**मञ्जूषा**<br>पदयात्रिणः, दुर्घटना, परिणामाः, अवधानेन, दक्षिणतः, रक्त-हरित-पीत-सङ्केतान्, नियमाः, चतुष्पथि, पालनीयाः, दृष्ट्वा, वामतः, वाहनचालनसमये, यातायातसङ्केताः। | |
| | | |
| 4. | **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत –**<br>(i) विज्ञान के इस युग में बहुत आविष्कार हुए।<br>In this era of science, numerous inventions have taken place.<br>(ii) स्वस्थ शरीर में स्वस्थ मन होता है।<br>A healthy mind resides in a healthy body.<br>(iii) रूस और यूक्रेन के बीच युद्ध कब समाप्त होगा?<br>When will the war between Russia and Ukraine come to an end?<br>(iv) तुम्हारा स्वास्थ्य कैसा है?<br>How is your health?<br>(v) कभी भी अहंकार मत करो।<br>Never be arrogant. | 5×1=5 |
| | | |
| | **'ग' खण्डः**<br>**अनुप्रयुक्तव्याकरणम्** (25 अङ्काः) | |
| | | |
| 5. अ | **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-**<br>(i) **<u>योजकस्तत्र</u>** दुर्लभः।<br>(ii) कर्तुं शक्यो **<u>भवेत् + येन</u>** स विवेक इतीरितः।<br>(iii) बुद्धिमती भयात् **<u>पुनः + अपि</u>** मुक्ताऽभवत्।<br>(iv) राजासनं **<u>खल्वेतत्</u>**, न युक्तमध्यासितुम्।<br>**अथवा** | 4×1=4 |
| आ | **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-**<br>(i) यानानां **<u>पङ्क्तयो हि</u>** अनन्ताः कठिनं संसरणम्।<br>(ii) कश्चित् **खगः + एव** वनराजः भविष्यति। | |

| | | |
|---|---|---|
| | (iii) सः रात्रिनिवासं कर्तुं **<u>कञ्चिद्</u>** गृहस्थमुपागत।<br>(iv) **<u>सर्वे + अपि</u>** नैतादृशाः। | |
| | | |
| 6. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत –**<br>(i) **<u>महादेवी</u>** करुणां करोतु।<br>(क) महा देवी (ख) महती च इयं देवी<br>(ग) महत् देवी (घ) महान् देवी<br>(ii) **<u>समानशीलव्यसनेषु</u>** सख्यम्।<br>(क) समानं शीलं व्यसनं येषां तेषु (ख) समानं च शीलं च व्यसनं च<br>(ग) समान-शील-व्यसनैः सह (घ) समानं शीलं व्यसनं यत्र समानम्<br>(iii) कुत्सितवस्तुमिश्रितं भक्ष्यं **<u>समलं</u>** धरातलम्।<br>(क) मलं मलं प्रति (ख) मलस्य अभावः<br>(ग) मलस्य योग्यम् (घ) मलेन सहितम्<br>(iv) ततः प्रविशतः तापसौ **<u>कुशलवौ</u>**।<br>(क) कुशः च लवौ च (ख) कुशलवयोः समाहारः<br>(ग) कुशः च लवः च (घ) कुशौ च लवौ च | 4×1=4 |
| | | |
| 7. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत -**<br>(i) वाक्पटुः **<u>धैर्य + मतुप्</u>** मन्त्री सभायामप्यकातरः।<br>(क) धैर्यमान् (ख) धैर्यवती<br>(ग) धैर्यमन्तः (घ) धैर्यवान्<br>(ii) सा **<u>भामिन् + ङीप्</u>** व्याघ्रस्य भयात् विमुक्ता।<br>(क) भामिनः (ख) भामिनी<br>(ग) भामिन (घ) भामिना<br>(iii) पिता तनूजस्य **<u>रुग्णताम्</u>** आकर्ण्य व्याकुलः जातः।<br>(क) रोगी+टाप् (ग) रुग्+ताम्<br>(ग) रुग्ण+तल् (घ) रुग्ण+ताम्<br>(iv) किं **<u>कुपिता</u>** एवं भणति उत प्रकृतिस्था?<br>(क) कुप् + क्त (ख) कुप् + ठक्<br>(ग) कुप् + तल् (घ) कुप् + मतुप् | 4×1=4 |
| | | |
| 8. | **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखित-वाक्यानि पुनः लिखत –**<br>(i) पित्रा आपणात् --------------- आनीयन्ते। | 3×1=3 |

| | | |
|---|---|---|
| | (क) फलानि (ख) फलम्<br>(ग) फले (घ) फलैः<br>(ii) ------------- शाटिकां क्रीणामि।<br>(क) मया (ख) अहम्<br>(ग) अस्मभिः (घ) आवाम्<br>(iii) अहमत्र भवतोः जनकं नामतो वेदितुम् ---------------?<br>(क) इष्यते (ख) इष्यन्ते<br>(ग) इच्छामि (घ) इच्छति | |
| 9. | **कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत-**<br>(i) भाविका प्रातः --------- (4:00) वादने उत्तिष्ठति।<br>(ii) तदनन्तरं सा ----------- (05:15) वादने योगाभ्यासं करोति।<br>(iii) योगासनात् परं सा ------------- (6:30) वादने स्नानं करोति।<br>(iv) तदनन्तरं सा ------------- (7:45) वादने विद्यालयं गच्छति। | 4×1=4 |
| 10. | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत -**<br>(i) ------- असत्यं वदिष्यति तर्हि उचितं न स्यात्।<br>(ii) कर्महीनः जनः ------- भ्रमित्वा समयं यापयति।<br>(iii) अहम् --------- तत्र गन्तुम् इच्छामि।<br>**मञ्जूषा**<br>इतस्ततः, अपि, यदि । | 3×1=3 |
| 11. | **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत –**<br>(i) ते **वृक्षाणि** हरिताः सन्ति।<br>(क) वृक्षाः (ख) वृक्षः<br>(ग) वृक्षे (घ) वृक्षम्<br>(ii) पिता पुत्राय **क्रुध्यन्ति**।<br>(क) क्रुध्यामि (ख) क्रुध्यतः<br>(ग) क्रुध्यति (घ) क्रुध्यसि<br>(iii) बालकः ह्यः **गच्छति**।<br>(क) गमिष्यति (ख) गच्छतु<br>(ग) अगच्छत् (घ) गच्छेत् | 3×1=3 |

| | | |
|---|---|---|
| | **'घ' खण्डः**<br>**पठितावबोधनम्** **(30 अङ्काः)** | |
| 12. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे अपतत्। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषभः नोत्थितः। भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्। सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत् –"अयि शुभे ! किमेवं रोदिषि?"<br>सा च "भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न?" इति प्रत्यवोचत्।<br>"भद्रे! नूनम्। सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम्?" इति इन्द्रेण पृष्टा सुरभिः प्रत्यवोचत् – बहून्यपत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। | 5 |
| | **I. एकपदेन उत्तरत -** **(केवलं प्रश्नद्वयम्)**<br>(i) वृषभः कुत्र अपतत्?<br>(ii) सर्वधेनूनां माता का आसीत्?<br>(iii) सुरभिः कस्य दैन्यं दृष्ट्वा रोदिति स्म? | 2×½=1 |
| | **II. पूर्णवाक्येन उत्तरत -** **(केवलं प्रश्नद्वयम्)**<br>(i) सुरभिः किमर्थं तस्मिन् पुत्रे एव विशिष्य आत्मवेदनामनुभवति?<br>(ii) सुराधिपः सर्वप्रथमं सुरभिं किम् अपृच्छत्?<br>(iii) सुरभेः नेत्राभ्यामश्रूणि किमर्थम् आविरासन्? | 2×1=2 |
| | **III. (अ) निर्देशानुसारम् उत्तरत -**<br>(i) 'अपत्यानि' इति पदस्य विशेषणपदं किं प्रयुक्तम्?<br>(ii) 'अनुभवामि' इत्यर्थे गद्यांशे कर्तृपदं किं प्रयुक्तम्?<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>(i) 'स्नेहः' इत्यस्य किं पर्यायपदं गद्यांशात् चित्वा लिखत।<br>(ii) "सः कृच्छ्रेण भारमुद्वहति।" अत्र 'सः' इति सर्वनामपदं कस्मै प्रयुक्तम्? | 2×1=2 |
| 13. | **अधोलिखिते पद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>**आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**<br>**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ॥** | 5 |

| | | |
|---|---|---|
| | **यः इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।**<br>**न कुर्यादहितं कर्म स परेभ्यः कदापि च ॥**<br>I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) मानवः केभ्यः अहितं कर्म न कुर्यात्?<br>(ii) आलस्यं कुत्र स्थितः भवति?<br>(iii) मनुष्याणां बन्धुः कः अस्ति?<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) यः जनः सुखानि इच्छति सः किं न कुर्यात्?<br>(ii) किं कृत्वा मानवः दुःखी न भवति?<br>(iii) मनुष्याणां महान् रिपुः कः अस्ति<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) 'प्रभूतानि' इति पदस्य विशेष्यपदं किम् अस्ति?<br>(ii) "यः इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।" अत्र क्रियापदं किम् अस्ति?<br>**अथवा**<br>(आ) निर्देशानुसारम् उत्तरत -<br>(i) अत्र 'बन्धुः' इत्यस्य किं विलोमपदं प्रयुक्तम्?<br>(ii) 'अस्ति' इति क्रियापदस्य कर्तृपदं चित्वा लिखत। | 2×½=1<br><br>2×1=2<br><br>2×1=2 |
| 14. | अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –<br>एवमेव वानराः वारं वारं सिंहं तुदन्ति। क्रुद्धः सिंहः इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति। वानराः हसन्ति वृक्षोपरि च विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति। निद्राभङ्गदुःखेन वनराजः सन्नपि तुच्छजीवैः आत्मनः एतादृश्या दुरवस्थया श्रान्तः सर्वजन्तून् दृष्ट्वा पृच्छति -<br>**सिंहः -** (क्रोधेन गर्जन्) भोः! अहं वनराजः किं भयं न जायते? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?<br>**एकः वानरः -** यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्वरक्षायामपि समर्थः नासि तर्हि कथमस्मान् रक्षिष्यसि?<br>**अन्यः वानरः -** किं न श्रुता त्वया पञ्चतन्त्रोक्तिः:-<br>यो न रक्षति वित्रस्तान् पीड्यमानान्परैः सदा।<br>जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः ॥<br>**काकः -** आम्, सत्यं कथितं त्वया। वस्तुतः वनराजः भवितुम् अहमेव योग्यः।<br>I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) अत्र कः आत्मानं वनराजः भवितुं योग्यः मन्यते? | 5<br><br>2×½=1 |

| | | |
|---|---|---|
| | (ii) वनराजस्य दुरवस्थां दृष्ट्वा के कलरवं कुर्वन्ति?<br>(iii) के वारं वारं सिंहं तुदन्ति?<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) अत्र वानरः सिंहं किमर्थं वनराजः भवितुं सर्वथाऽयोग्यं मन्यते?<br>(ii) कः पार्थिवरूपेण कृतान्तः मन्यते?<br>(iii) क्रुद्धः सिंहः किमर्थम् इतस्ततः धावति गर्जति च?<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) 'कलरवम्' इति पदस्य विशेषणपदं किं प्रयुक्तम्?<br>(ii) 'जायते' इति क्रियापदस्य किं कर्तृपदं नाट्यांशे प्रयुक्तम्?<br>**अथवा**<br>(आ) निर्देशानुसारम् उत्तरत -<br>(ii) 'रक्षकः' इति पदस्य विपर्ययपदं नाट्यांशात् चित्वा लिखत।<br>(ii) "किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?" अत्र 'माम्' इति सर्वनामपदं कस्मै युक्तम्? | 2×1=2<br><br>2×1=2 |
| | | |
| 15. | रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत -<br>(i) चातकः **<u>पुरन्दरं</u>** जलं याचते।<br>(ii) बुद्धिमती **<u>पितुः</u>** गृहं प्रति चलिता।<br>(iii) अपूर्वोऽयं **<u>मानवानां</u>** सरस्वत्यवतारः।<br>(iv) **<u>व्याघ्रमारी</u>** तूर्णं धाविता। | 4×1=4 |
| | | |
| 16.अ<br><br><br><br><br><br><br><br><br><br><br>आ | मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत –<br>**वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।**<br>**कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम् ॥**<br>**करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्।**<br>**अन्वयः** - वायुमण्डलम् (i) ------ दूषितम्(अस्ति)। जलम् हि निर्मलम् न (अस्ति) (ii)------- कुत्सितवस्तुमिश्रितम् (अस्ति) धरातलम् समलम् (अस्ति)। (iii) ------- बहिः अन्तः (च) तु बहु शुद्धीकरणम् (iv) ------------ (अस्ति)।<br>**मञ्जूषा**<br>जगति, करणीयम्, भक्ष्यम्, भृशम्।<br>**अथवा**<br>मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -<br>**आपेदिरेऽम्बरपथं परितः पतङ्गाः भृङ्गाः रसालमुकुलानि समाश्रयन्ते।**<br>**सङ्कोचमञ्चति सरस्त्वयि दीनदीनो मीनो नु हन्त कतमां गतिमभ्युपैतु॥** | 4×1=4 |

*अवधेयम् - 2024-25 इति शैक्षणिकसत्रस्य मूल्याङ्कनयोजना 2025-26 इति वर्तमानशैक्षणिकसत्रे अपि अनुवर्तिष्यते।

| | | |
|---|---|---|
| | **भावार्थः** - हे सरोवर! (i) ---------- सङ्कुचिते सति अर्थात् यदा त्वं शुष्कं जायमानः अस्ति तदा तव समीपस्थाः खगाः आकाशमार्गेण अन्यत्र गच्छन्ति। (ii) ----------------- आम्रपुष्पाणाम् आश्रयं स्वीकुर्वन्ति, किन्तु त्वयि स्थिताः दीनाः (iii) ------------ कुत्र गच्छेयुः? ते तु अत्रैव स्थास्यन्ति अन्यत्र कुत्रापि न (iv) ---------------। आपत्काले स्वामिभक्ता एव सह तिष्ठन्ति अन्ये स्वार्थिनः मैत्रीं त्यजन्ति।<br>**मञ्जूषा**<br>भ्रमराः, गमिष्यन्ति, मत्स्याः, त्वयि। | |
| 17. | **अधोलिखित-कथांशं समुचित-क्रमेण लिखत –**<br>(i) चौरस्य पदध्वनिना अतिथिः प्रबुद्धः अभवत् धावित्वा तं चौरम् अगृह्णाच्च।<br>(ii) न्यायाधीशः आरक्षिणे कारादण्डम् आदिश्य अतिथिं ससम्मानं मुक्तवान्।<br>(iii) कश्चन निर्धनः जनः रुग्णं पुत्रं द्रष्टुं बसयानं विहाय पदातिरेव प्राचलत्।<br>(iv) मार्गे रात्रौ सः कस्यचित् गृहे आश्रयं प्राप्तवान्।<br>(v) न्यायाधीशः पृथक्-पृथक् विवरणं श्रुतवान् किन्तु प्रमाणाभावात् निर्णेतुं नाशक्नोत्।<br>(vi) तस्मिन् गृहे रात्रौ कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।<br>(vii) न्यायाधीशः पुनः तौ घटनायाः विषये वक्तुम् आदिष्टवान्।<br>(viii) आरक्षी एव तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागारे प्राक्षिपत्। | 8×½=4 |
| 18. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**<br>(i) मां निजगले बद्ध्वा चल **सत्वरम्**।<br>(क) सर्वम् (ख) सत्वम्<br>(ग) दूरम् (घ) शीघ्रम्<br>(ii) अन्येषां **वदने** ये तु ते चक्षुर्नामनी मते।<br>(क) वादने (ख) मुखे<br>(ग) सम्भाषणे (घ) वचने<br>(iii) **उदीरितः** अर्थः पशुना अपि गृह्यते।<br>(क) चिन्तितः (ख) विचारितः<br>(ग) कथितः (घ) विस्मृतः | 3×1=3 |

-------------0000-------------

# संस्कृतम् (कोड-सङ्ख्या - 122)
# आदर्श-प्रश्नपत्रम्
## कक्षा - दशमी (2025-26)

**अवधिः - होरात्रयम्** **अङ्कयोजना उत्तरसङ्केताश्च** **सम्पूर्णाङ्काः - 80**

**अवधातव्यम् -**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्। **(अयं नियमः नवम्यां कक्षायां अपि परिपालनीयः।)**
3. अनुच्छेदे श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

| | **खण्डः ‘क’ अपठितावबोधनम्** | |
|---|---|---|
| 1. | **गद्यांशः -** | 10 |
| | **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** | 2×1=2 |
| | (i) श्वासमाध्यमेन | |
| | (ii) प्रदूषणसमस्यायाः | |
| | (iii) प्रदूषणम् | |
| | **आ. पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)** | 2×2=4 |
| | (i) वायुप्रदूषणेन विविधाः श्वासरोगाः, हृदयरोगाः, चर्मरोगाः, नेत्ररोगाः भवन्ति। | |
| | (ii) अद्यत्वे जायमानैः युद्धैः, युद्धाभ्यासैः, यन्त्रालयानां यानानां च धूमेन सम्पूर्णवायुमण्डलं दूषितं सञ्जातम्। | |
| | (iii) प्रदूषणस्य निवारणाय वृक्षाः रोपणीयाः,उद्योगानां विस्तारः च वैज्ञानिकरीत्या करणीयः आयुद्धगतिविधयः निवारणीयाः। | |

| | | |
|---|---|---|
| | **इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत -**<br>**प्रदूषणम् / पर्यावरणस्य संरक्षणम्/ प्रदूषणसमस्या**<br>छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचितः निर्णयः करणीयः।<br>**ई. यथानिर्देशम् उत्तरत -**<br>(i) (घ) स्वच्छम्<br>(ii) (ख) जलम्<br>(iii) (घ) वायुः | 1<br><br><br>3×1=3 |
| | **खण्डः 'ख' रचनात्मकं कार्यम्** | |
| 2. अ<br><br><br><br><br>आ | **पत्रलेखनम् -**<br>**भवान् हितेशः। पितुः स्थानान्तरणवशात् भवान् असमप्रदेशात् दिल्लीनगरम् आगत्य नूतनविद्यालये प्रवेशं प्राप्तवान्। मञ्जूषायां दत्तानां पदानां सहायतया अस्य नगरस्य विद्यालयस्य च वर्णनं कुर्वन् मित्रं राघवेन्द्रं प्रति पत्रं लिखतु।**<br>**अथवा**<br>**भवती सुमेधा तिरुपतिस्थे राजकीये माध्यमिकविद्यालये दशमीकक्षायां पठति। भवती विद्यालयस्य शुल्कं दातुम् असमर्था अस्ति अतः मञ्जूषायां दत्तानां पदानां सहायतया शुल्कक्षमार्थं निवेदयन्ती प्रधानाचार्यां प्रति प्रार्थनापत्रं लिखतु।**<br>छात्राः पूर्णं पत्रं लेखिष्यन्ति। शुद्धपत्राय पूर्णाङ्काः प्रदेयाः। व्याकरणसम्बद्ध-दोषेभ्यः आंशिक-रूपेणैव अङ्काः कर्तनीयाः न तु पूर्णाः। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते। | 5 |
| 3. अ<br><br><br><br><br><br><br>आ | **चित्रवर्णनम् -**<br>अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। **अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति।** वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते।<br>**अथवा**<br>**अनुच्छेदलेखनम् -**<br>अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः। | 5×1=5 |
| | | |

| | | |
|---|---|---|
| 4. | **अनुवादः -**<br>(i) अस्मिन् वैज्ञानिकयुगे बहवः आविष्काराः जाताः/अभवन्।<br>(ii) स्वस्थे शरीरे स्वस्थं मनः भवति।<br>(iii) रूसदेशस्य यूक्रेनदेशस्य च मध्ये युद्धं कदा समाप्तं भविष्यति?<br>(iv) तव स्वास्थ्यं कथम् अस्ति?<br>(v) कदापि अहङ्कारं मा कुरु/कुरुत। | 5×1=5 |
| | **खण्डः 'ग' अनुप्रयुक्तव्याकरणम्** | |
| 5.अ<br><br><br><br><br><br>आ | **सन्धिः सन्धिच्छेदश्च -**<br>(i) योजकः + तत्र<br>(ii) भवेद्येन<br>(iii) पुनरपि<br>(iv) खलु + एतत्<br>**अथवा**<br>**सन्धिः सन्धिच्छेदश्च -**<br>(i) पङ्क्तयः + हि<br>(ii) खग इव<br>(iii) कं + चिद्<br>(iv) सर्वेऽपि | 4×1=4 |
| | | |
| 6. | **समासः विग्रहः च -**<br>(i) (ख) महती च इयं देवी<br>(ii) (क) समानं शीलं व्यसनं येषां तेषु<br>(iii) (घ) मलेन सहितम्<br>(iv) (ग) कुशः च लवः च | 4×1=4 |
| | | |
| 7. | **प्रत्ययाः -**<br>(i) (घ) धैर्यवान्<br>(ii) (ख) भामिनी<br>(iii) (ग) रुग्ण + तल्<br>(iv) (क) कुप् + क्त | 4×1=4 |
| | | |
| 8. | **वाच्यम् -**<br>(i) (क) फलानि<br>(ii) (ख) अहम् | 3×1=3 |

| | | |
|---|---|---|
| | (iii) (ग) इच्छामि | |
| | | |
| 9. | **समयः -**<br>(i) चतुर्वादने<br>(ii) सपादपञ्चवादने<br>(iii) सार्धषड्वादने<br>(iv) पादोनाष्टवादने/पादोन-अष्टवादने | 4×1=4 |
| | | |
| 10. | **अव्ययपदानि -**<br>(i) यदि<br>(ii) इतस्ततः<br>(iii) अपि | 3×1=3 |
| 11. | **अशुद्धिसंशोधनम् -**<br>(i) (क) वृक्षाः<br>(ii) (ग) क्रुध्यति<br>(iii) (ग) अगच्छत् | 3×1=3 |
| | | |
| | **खण्डः 'घ' पठितावबोधनम्** | |
| 12. | **गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) भूमौ/क्षेत्रे<br>(ii) सुरभिः<br>(iii) पुत्रस्य<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) सुरभिः तस्मिन् पुत्रे एव विशिष्य आत्मवेदनामनुभवति यतो हि सः अन्येभ्यो दुर्बलः।<br>(ii) सुराधिपः सर्वप्रथमं सुरभिम् अपृच्छत्- "अयि शुभे ! किमेवं रोदिषि?"<br>(iii) भूमौ पतिते स्वपुत्रं दृष्ट्वा सुरभेः नेत्राभ्यामश्रूणि आविरासन्।<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) बहूनि<br>(ii) अहम्<br>**अथवा**<br>(आ) निर्देशानुसारम् उत्तरत -<br>(i) वात्सल्यम्<br>(ii) वृषभाय | 5<br><br>2×½=1<br><br>2×1=2<br><br>2×1=2 |

| | | |
|---|---|---|
| 13. | पद्यांशः | 5 |
| | I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×½=1 |
| | (i) परेभ्यः<br>(ii) शरीरे/मानवशरीरे/शरीरस्थः<br>(iii) उद्यमः | |
| | II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×1=2 |
| | (i) यः जनः सुखानि इच्छति सः कदापि परेभ्यः अहितं कर्म न कुर्यात्।<br>(ii) उद्यमं/परिश्रमं कृत्वा मानवः दुःखी न भवति।<br>(iii) मनुष्याणां महान् रिपुः आलस्यम् अस्ति। | |
| | III. (अ) निर्देशानुसारम् उत्तरत - | 2×1=2 |
| | (i) सुखानि<br>(ii) इच्छति<br>**अथवा** | |
| | (आ) निर्देशानुसारम् उत्तरत -<br>(i) रिपुः<br>(ii) बन्धुः | |
| | | |
| 14. | अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - | 5 |
| | I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×½=1 |
| | (i) काकः<br>(ii) पक्षिणः<br>(iii) वानराः | |
| | II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×1=2 |
| | (i) वानरः सिंहं वनराजः भवितुं सर्वथाऽयोग्यं मन्यते यतोहि सः भक्षकः अस्ति, इतोऽपि सः आत्मरक्षायाम् असमर्थोऽपि अस्ति।<br>(ii) यः परैः पीड्यमानान् वित्रस्तान् न रक्षति सः पार्थिवरूपेण कृतान्तः मन्यते।<br>(iii) वानराः वारं वारं सिंहं तुदन्ति अतः किमपि कर्तुम् असमर्थः क्रुद्धः सः इतस्ततः धावति। | |
| | III. (अ) निर्देशानुसारम् उत्तरत - | 2×1=2 |
| | (i) हर्षमिश्रितम्<br>(ii) भयम्<br>**अथवा** | |
| | (आ) निर्देशानुसारम् उत्तरत -<br>(i) भक्षकः | |

| | | |
|---|---|---|
| | (ii) सिंहाय | |
| 15. | **प्रश्ननिर्माणं कुरुत -**<br>(i) चातकः **कं** जलं याचते?<br>(ii) बुद्धिमती **कस्य** गृहं प्रति चलिता?<br>(iii) अपूर्वोऽयं **केषां** सरस्वत्यवतारः?<br>(iv) **का** तूर्णं धाविता? | 4×1=4 |
| 16. अ<br><br><br><br><br>आ | **अन्वयः -**<br>वायुमण्डलम् (i) **भृशम्** दूषितम् (अस्ति)। जलम् हि निर्मलम् न (अस्ति) (ii) **भक्ष्यम्** कुत्सितवस्तुमिश्रितम् (अस्ति), धरातलम् समलम् (अस्ति)। (iii) **जगति** बहिः अन्तः (च) तु बहु शुद्धीकरणम् (iv) **करणीयम्** (अस्ति)।<br>**अथवा**<br>**भावार्थे रिक्तस्थानपूर्तिः -**<br>**भावार्थः-** हे सरोवर! (i) **त्वयि** सङ्कुचिते सति अर्थात् यदा त्वं शुष्कं जायमानः अस्ति तदा तव समीपस्थाः खगाः आकाशमार्गेण अन्यत्र गच्छन्ति। (ii) **भ्रमराः** आम्रपुष्पाणाम् आश्रयं स्वीकुर्वन्ति, किन्तु त्वयि स्थिताः दीनाः (iii) **मत्स्याः** कुत्र गच्छन्तु ? ते तु अत्रैव स्थास्यन्ति अन्यत्र कुत्रापि न (iv) **गमिष्यन्ति** । आपत्काले स्वामिभक्ता एव सह तिष्ठन्ति अन्ये स्वार्थिनः मैत्रीं त्यजन्ति। | 4×1=4 |
| 17. | **कथा-क्रमानुसार-लेखनम् -**<br>(i) कश्चन निर्धनः जनः रुग्णं पुत्रं द्रष्टुं बसयानं विहाय पदातिरेव प्राचलत्।<br>(ii) मार्गे रात्रौ सः कस्यचित् गृहे आश्रयं प्राप्तवान्।<br>(iii) तस्मिन् गृहे रात्रौ कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।<br>(iv) चौरस्य पदध्वनिना अतिथिः प्रबुद्धः अभवत् धावित्वा तं चौरम् अगृह्णाच्च।<br>(v) आरक्षी एव तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागारे प्राक्षिपत्।<br>(vi) न्यायाधीशः पृथक्-पृथक् विवरणं श्रुतवान् किन्तु प्रमाणाभावात् निर्णेतुं नाशक्नोत्।<br>(vii) न्यायाधीशः पुनः तौ घटनायाः विषये वक्तुम् आदिष्टवान्।<br>(viii) न्यायाधीशः आरक्षिणे कारादण्डम् आदिश्य अतिथिं ससम्मानं मुक्तवान्। | 8×½=4 |
| 18. | **प्रसङ्गानुकूलम् उचितार्थम् -**<br>(i) (घ) शीघ्रम्<br>(ii) (ख) मुखे<br>(iii) (ग) कथितः | 3×1=3 |

-------------0000--------------